শ্ৰীঃ

শ্ৰীমতে নিগমান্তমহাদেশিকায নমঃ

শ্ৰীমান্ ৰেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৰেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্ৰী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৪

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্ৰী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৪

*অষ্টাঙ্গযোগৱর্ণনং যোগসিদ্ধিৱর্ণনং চ*

কল্যতাং মম কুরুষ্ৱ তাৱতীং কল্যতে ভৱদুপাসনং যযা।
স্পষ্টমষ্টৱিধযোগচর্যযা পুষ্টযাশু তৱ তুষ্টিমাপ্নুযাম্॥ ১ ॥

ব্রহ্মচর্যংদৃঢতাদিভির্যমৈরাপ্লৱাদিনিযমৈশ্চ পাৱিতাঃ।
কুর্মহে দৃঢমমী সুখাসনং পঙ্কজাদ্যমপি ৱা ভৱতপরাঃ॥ ২ ॥

তারমন্তরনুচিন্ত্য সন্ততং প্রাণৱাযুমভিযম্য নির্মলাঃ।
ইন্দ্রিযাণি ৱিষযাদথাপহৃত্যাস্মহে ভৱদুপাসনোন্মুখাঃ॥ ৩ ॥

অস্ফুটে ৱপুষি তে প্রযত্নতো ধারযেম ধিষণাং মুহুর্মুহুঃ।
তেন ভক্তিরসমন্তরার্দ্রতামুদ্বহেম ভৱদঙ্ঘ্রিচিন্তকাঃ॥ ৪ ॥

ৱিস্ফুটাৱযৱভেদসুন্দরং ত্বদ্বপুসসুচিরশীলনাৱশাত্।
অশ্রমং মনসি চিন্তযামহে ধ্যানযোগনিরতাস্তৱদাশ্রযাঃ॥ ৫ ॥

ধ্যাযতাং সকলমূর্তিমীদৃশীমুন্মিষন্মধুরতাহৃতাত্মনাম্।
সান্দ্রমোদরসরূপমান্তরং ব্রহ্মরূপমযি তেৱভাসতে॥ ৬ ॥

ততসমাস্বদনরূপিণীং স্থিতিং ত্বতসমাধিমযি ৱিশ্বনাযক।
আশ্রিতাঃ পুনরতঃ পরিচ্যুতাৱারভেমহি চ ধারণাদিকম্॥ ৭ ॥

ইত্থমভ্যসননির্ভরোল্লসত্ ত্বতপরাত্মসুখকল্পিতোতসৱাঃ।
মুক্তভক্তকুলমৌলিতাং গতাঃ সঞ্চরেম শুকনারদাদিৱত্॥ ৮ ॥

ত্বতসমাধিৱিজযে তু যঃ পুনর্মঙ্ক্ষু মোক্ষরসিকঃ ক্রমেণ ৱা।
যোগৱশ্যমনিলং ষডাশ্রযৈরুন্নযত্যজ সুষুম্নযা শনৈঃ॥ ৯ ॥

লিঙ্গদেহমপি সংত্যজন্নথো লীযতে ত্বযি পৰে নিৰাগ্ৰহঃ।
ঊৰ্ধ্বলোককুতুকী তু মূৰ্ধতসসাৰ্ধমেৱ কৰণৈৰ্নিৰীযতে॥ ১০ ॥

অগ্নিৱাসৰৱলৰ্ক্ষপক্ষগৈৰুত্তৰাযণজুষা চ দৈৱতৈঃ।
প্ৰাপিতো ৰৱিপদং ভৱতপৰো মোদৱান্ ধ্ৰুৱপদান্তমীযতে॥ ১১ ॥

আস্থিতোথ মহৰালযে যদা শেষৱক্ত্ৰদহনোষ্মণাৰ্দ্যতে।
ঈযতে ভৱদুপাশ্ৰযস্তদা ৱেধসঃ পদমতঃ পুৰৈৱ ৱা॥ ১২ ॥

তত্ৰ ৱা তৱ পদেথৱা ৱসন্ প্ৰাকৃতপ্ৰলয এতি মুক্ততাং।
স্বেচ্ছযা খলু পুৰা ৱিমুচ্যতে সংৱিভিদ্য জগদণ্ডমোজসা॥ ১৩ ॥

তস্য চ ক্ষিতিপযোমহোনিলদ্যোমহতপ্ৰকৃতিসপ্তকাৱৃতীঃ।
তত্তদাত্মকতযা ৱিশন্ সুখী যাতি তে পদমনাৱৃতং ৱিভো॥ ১৪ ॥

অৰ্চিৰাদিগতিমীদৃশীং ৱ্ৰজন্ ৱিচ্যুতিং ন ভজতে জগতপতে।
সচ্চিদাত্মক ভৱদগুণোদযানুচ্চৰন্তমনিলেশ পাহি মাম্॥ ১৫ ॥

**********